ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया। पल्लीग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम्।) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥ (ग्राम्यं अश्लीलं वल्लभं प्रियं यस्याः इति विग्रहे वेश्या। इति व्युत्पत्तिलब्धोऽर्थः॥)

ग्राम्यशूकरः, पुं, स्त्री, (ग्राम्यः शूकरः।) ग्रामोत्पन्नवराहः। तत्पर्य्यायः। विड्वराहः २ ग्रामीणः ३ ग्रामक्रोडः ४ ग्रामकोलः ५ विष्कलः ६ दारकः ७। तस्य मांसस्य गुणाः। वनवराहमांसाद्गुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ग्राम्या, स्त्री, (ग्रामे भवा। ग्राम+"ग्रामात् यखञौ।" ४।२।९४। इति यः। स्त्रियां टाप्।) नीली। निष्पावी। इति राजनिर्घण्टः॥ (तुलसी। इति चिन्तामणिः॥)

ग्राम्याश्वः, पुं, (ग्राम्यः ग्रामजातोऽश्वः।) गर्द्दभः। इति त्रिकाण्डशेषः॥

ग्रावा, [न्] पुं, (ग्रसते इति ग्रः। ग्रस्+अन्येभ्योऽपीति डः। आवनति शब्दायते इति। आ+वन शब्दे+विच्। ततो ग्रश्चासौ आवा चेति।) प्रस्तरः। (यथा, भागवते।४।५।१८।

"सर्व्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः।
तैरर्द्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन्॥")

पर्व्वतः। इत्यमरः।२।३।१॥ (यथा,—

"पृथ्वी तावत् त्रिकोणा विपिननदनदीग्रावबद्धं तदह्नम्॥"

इत्युद्भटः॥)

मेघः। इति विश्वः॥ दृढे त्रि। इति शब्दरत्नावली॥

ग्रासः, पुं, (ग्रस्यते अद्यते इति। ग्रस्+कर्म्मणि घञ्।) मुखपूरणान्नादि। यथा,—

"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्।
एतं ग्रासं विजानीयात् शुद्ध्यर्थे कायशोधनम्॥"

इति प्रायश्चित्तप्रकरणे पराशरः॥

(तथा च मनुः।११।२१२।

"एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत्॥")

तत्पर्य्यायः। कवलः २। इत्यमरः।२।९।५४॥ गुड़ेरकः ३ पिण्डः ४ गण्डोलः ५ कवकः ६ गुरः ७। इति हेमचन्द्रः।३।८६॥ (दशौषधकालान्तर्गतकालविशेषः। "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुः ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः॥" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ग्राहः, पुं, (गृह्यते इति। ग्रह ञ उपादाने+भावे घञ्।) ग्रहणम्। (गृह्णातीति। ग्रह+"विभाषा ग्रहः।" ३।१।१४३। इति व्यवस्थापितविभाषया णः।) जलजन्तुविशेषः। हाङ्गर इति भाषा॥ जलहस्ती इति केचित्॥ तत्पर्य्यायः। अवहारः २। इत्यमरभरतौ॥ (यथा, महाभारते।१।२१।५।

"श्रीयुक्तैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा।
उग्रैर्नित्यमनाधृष्यं कूर्म्मग्राहसमाकुलम्॥")

शिशुकः। इति राजनिर्घण्टः॥ (आग्रहः। यथा, गीतायाम्।१७।१९।

"मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः॥"
"मूढ़ग्राहेणाविवेककृतेन दुराग्रहेण।" इति श्रीधरस्वामी॥)

ग्राहकः, पुं, (गृह्णातीति। ग्रह+ण्वुल्।) सितावरशाकम्। इति राजनिर्घण्टः॥ हिंस्रपक्षी। बालग्राही। ग्रहीतरि त्रि। इति शब्दरत्नावली॥ (ग्रह+णिच्+ण्वुल्। ज्ञापकः। यथा, महाभारते।३।२१०।१३।

"यथास्वं ग्राहकाण्येषां शब्दादीनामिमानि तु॥")

ग्राहिणी, स्त्री, (गृह्णाति अशेषगुणानिति। ग्रह उपादाने+"नन्दिग्रहीति।" ३।१।१३४। इति णिनिः ङीप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ ताम्रमूलावृक्षः। इति रत्नमाला॥ चिरद इति भाषा॥

ग्राहिफलः, पुं, (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

ग्राही, [न्] पुं, (गृह्णातीति। ग्रह+णिनिः।) कपित्थः। इति शब्दचन्द्रिका॥

ग्राही, [न्] त्रि, (गृह्णातीति। ग्रह+णिनिः।) मलबन्धकः। धारकः। इति वैद्यकम्॥ (यथा, भावप्रकाशे।

"काश्मरी हिमा ग्राही तुवरः श्लेष्मपित्तनुत्॥")

ग्रहणकर्त्ता। इति व्याकरणम्॥ (यथा, कथासरित्सागरे।२५।४९।

"तत्र तस्यैव कैवर्त्तपतेः सत्यव्रतस्य सः।
शफरग्राहिभिर्भृत्यैः प्राप्य दैवादगृह्यत॥"

प्रतिकूलः। यथा, भट्टिः।५।६३।

"मास्म भूर्ग्राहिणी भीरु! गच्छ सुतवाहिनी भव॥"
"हे भीरु! मास्म भूर्ग्राहिणी प्रतिकूला मा भूः।"

इति जयमङ्गलः॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया। गॄ निगरणे+"शेवायह्वजिह्वाग्रीवाप्वामीवाः।" उणां।१।१५४। इति वन्प्रत्ययेन निपातनात् साधुः।) गलघाटादिसमुदिता। इति भरतः॥ (यथा, शकुन्तलायां १ मे अङ्के।

"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्त-[दृष्टिः॥")

सा तु गर्भे मासमात्रेण भवति। इति सुखबोधः॥ तत्पर्य्यायः। शिरोधिः २ कन्धरा ३। इत्यमरः।२।६।८८॥ कन्धिः ४ शिरोधरा ५। इति राजनिर्घण्टः॥ कन्धराशिरा। इति मेदिनी। वे।६॥

ग्रीवी, [न्] पुं स्त्री, (ग्रीवा विद्यते यस्य। ग्रीवा+इनिः। दीर्घग्रीवावत्त्वया एव अस्य तथात्वम्।) उष्ट्रः। इति जटाधरः॥ प्रशस्तग्रीवायुक्ते त्रि॥

ग्रीष्मः, पुं, (ग्रसते रसान् इति। ग्रस अदने+"ग्रीष्मः।" उणां।१।१४९। इति भक् ग्रीभावश्च धातोः मुगागमश्च निपात्यते।) ऋतुविशेषः। (यथा, मनुः।६।२३।

"ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः॥")

स तु ज्यैष्ठाषाढ़ौ। तत्पर्य्यायः। उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ ऊष्मागमः ६ तपः ७। इत्यमरः।१।४।१९॥ घर्म्मः ८ तापनः ९ उष्णागमः १० उष्णकालः ११।

"ग्रैष्मिकन्त्वनभिष्यन्दि जलमित्येष निश्चयः॥"

इति राजनिर्घण्टः॥

("दीर्घवासरकं तीक्ष्णं ज्वालामालाकुलं जगत्।
दिशि ग्रीष्मे मृगतृष्णाः खिन्नाः स्युर्मृगवारिजः॥
नैरृतो मारुतो रूक्षः शीर्णपर्णा महीरुहाः।
दग्धं तृणाकुलारण्यं दावाग्निश्च दिशो दश॥
एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते।
तस्मात् क्रिया प्रतीकारं कुर्य्यात् संशमनं भिषक्॥
जलक्रीड़ा दिवानिद्रा सेवनं सुखसाधनम्।
श्यामारामारतं शस्तं कुञ्जकिञ्जल्कशीतलम्॥
नीलनालदलोपेतः श्रमघ्नो व्यजनानिलः।
केतक्या मोदकुसुमचन्दनोशीरशीतलैः॥
लेपनं शीतलं सम्यक् धारागाराश्रयः पुनः।
एवं क्रिया समापन्ने ग्रीष्मे च सुखसङ्गमः॥"

इति ग्रीष्मोपचारः॥

इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥

"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते॥
अतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत्।
भजेन्मधुरमेवान्नं लघुस्निग्धं हिमं द्रवम्॥
सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान्॥
मद्यं न पेयं पेयं वा स्वल्पं सुबहु वारि वा॥
अन्यथा शोफशैथिल्यदाहमोहान् करोति तत्।
कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः॥
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ।
पानकं पञ्चसारं वा नवमृद्भाजनस्थितम्॥
मोचचोचदलैर्युक्तं साम्लं मृण्मयशुक्तिभिः।
पाटलावासिताम्भः सकर्पूरं सुशीतलम्॥
शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम्॥
अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु।
वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु॥
सुगन्धिहिमपानीयसिच्यमानपटालिके।
कायमाने चिते चूतप्रवालफललुम्बिभिः॥
कदलीदलकह्लार-मृणालकमलोत्पलैः।
कल्पिते कोमलैस्तल्पे हसत्कुसुमपल्लवे॥
मध्यदिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा।
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि॥
निशाकरकराकीर्णे सौधपृष्ठे निशासु च।
आसना स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः॥
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः।
जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः॥
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः।
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः॥
मनोहरकलालापाः शिशवः सारिकाः शुकाः।
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः॥
जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम्॥"

इति वाभटे सूत्रस्थाने तृतीयेऽध्याये।